प्रश्ने पुलस्त्योक्तिः । "श्रूयताम् पूर्व्वमरुतामुत्पत्तिं कथयामि ते । स्वायम्भुवं समारभ्य यावन्मन्वन्तरं त्विदम् ॥ स्वायम्भुवस्य पुत्रोऽभून्मनोर्नाम प्रियव्रतः । तस्यासीत् सवनो नाम पुत्रस्त्रैलोक्यपूजितः ॥ स्वसुतपपाताथ स कामचारी समं महिष्या वसुमानपुत्रया । रराम तन्व्या सह कामचारी ततोऽम्बरात् प्राच्यवतास्य शुक्रम् ॥ पतिभिः समनुज्ञाताः पपुः पुष्करसंस्थितम् । तं शुक्रं पार्थिवेन्द्रस्य मन्यमानास्तदामृतम् ॥ पीतमात्रेण शुक्रेण पार्थिवेन्द्रोभवेन च । ब्रह्मतेजोविहीनास्ता जाताः पत्न्यस्तपस्विनाम् ॥ सुषुवुः सप्त तनयांस्ते रुदन्तोऽथ भैरवम् । तेषां रुदितशब्देन सर्व्वमापूरितं जगत् ॥ अथाजगाम भगवान् ब्रह्मलोकात् पितामहः । समभ्येत्याब्रवीद्बालान् मा रुदध्वं महाबलाः ! ॥ मरुतो नाम यूयं वै भविष्यध्वं वियच्चराः । इत्येवमुक्त्वा देवेशो ब्रह्मा लोकपितामहः ॥ तानादाय वियच्चारी मारुतानादिदेश ह । ते चासन् मरुतस्त्वाद्या मनोः स्वायम्भुवान्तरे" ॥ स्वारोचिषे तु मरुतो वक्ष्यामि शृणु नारद ! । स्वारोचिषस्य पुत्रश्च श्रीमानासीत् क्रतुध्वजः ॥ तस्य पुत्राभवन् सप्त सप्तार्च्चिःप्रतिमा मुने ! । तपोऽर्थं ते गताः शैलं महामेरुं नभश्चराः ॥ आराधयन्तो ब्राह्मणं पदमैन्द्रमथेप्सवः । ततो विपश्चिन्नामा स सहस्राक्षो भयातुरः ॥ घृतनामप्सरोमुख्यां प्राह नारद ! वाक्यवित् । यथा हि तपसो विघ्नं तेषां भवति सुन्दरि ! ॥ तथा कुरुष्व मा तेषु, सिद्धिर्भवतु वै यथा । इत्येवमुक्ता शक्रेण घृतना रूपशालिनी ॥ तत्राजगाम त्वरिता यत्र तप्यन्ति ते तपः । आश्रमस्याविदूरे तु नदीमन्दोदवाहिनी ॥ तस्यां स्नातुं समायाताः सर्व्वएव सहोदराः । सा तु स्नातुं सुचार्वङ्गी त्ववतीर्णा महानदीम् ॥ ददृशुस्ते नृपाः स्नातुं ततश्चुक्षुभिरे मुने ! । तेषाञ्च प्राच्यवत् शुक्रं, तत् पपौ जलचारिणी ॥ शङ्खिनी ग्राहमुख्यस्य महाशङ्खस्य वल्लभा । ते वै विनिष्टतपसो जग्मू राज्यन्तु पैतृकम् ॥ अथो बहुतिथे काले सा ग्राही शङ्खरूपिणी । समुद्धृता महाजालैर्मत्स्यबन्धेन मानिनो ॥ स तां दृष्ट्वा महाशङ्खीं स्थलस्थां मत्स्यजीवनः । निवेदयामास तदा क्रतुध्वजसुतेषु वै ॥ तथाभ्येत्य महात्मानो योगिनो योगधारिणः । नीत्वा स्वमन्दिरं सर्वे पुरव्याप्यां समुत्सृजन् ॥ ततः क्रमाच्छङ्खिनीसा सुषुवे सप्त वै शिशून् । जातमात्रेषु पुत्रेषु मोक्षभावमगाच्च सा ॥ अमातृपितृका बाला जलमध्यविचारिणः । स्तन्यार्थिनो वै रुरुदुरथाभ्यागात् पितामहः ॥ मा रुदध्वमिति प्राह मरुतो नाम पुत्रकाः ! । यूयं देवा भविष्यध्वं वायवोऽम्बरचारिणः ॥ इत्येवमुक्त्वाथादाय सर्व्वांस्तान् दैवतान् प्रति । नियोज्य च मरुन्मार्गे वैराजभवनं गतः ॥ एवमासंश्च मरुतो मनोः स्वारोचिषान्तरे । औत्तमे मरुतो ये च तान् शृणुष्व तपोधन ! ॥ औत्तमस्यान्ववाये च राजासीन्निषधाधिपः । वपुष्मानिति विख्यातो वपुषा भास्करोपमः ॥ तस्य पुत्त्रो गणश्रेष्ठो ज्योतिष्मान् धार्म्मिकोऽभवत् । स पुत्त्रार्थी तपस्तेपे नदीं मन्दाकिनीमनु ॥ तस्य भार्य्या च सुश्रोणी देवाचार्य्यसुता शुभा । तपश्चरणयुक्तस्य बभूव परिचारिका ॥ तेजोयुक्ता सुचार्व्वङ्गी दृष्टा सप्तर्षिभिर्व्वने । तां तथा चारुसर्व्वाङ्गीं दृष्ट्वाथ तपसा कृशाम् । पप्रच्छुस्तपसो हेतुन्तस्यास्तद्भर्त्तुरेव च । साऽब्रवीत्तनयार्थाय आवाभ्यां वै तपः क्रिया ॥ ते चास्यै वरदा ब्रह्मन् ! जाताः सप्त महर्षयः । व्रजध्वं तनयाः सप्त भविष्यन्ति न संशयः ॥ युवयोर्गुणसंयुक्ता महर्षीणां प्रसादतः । इत्येवमुक्त्वा जग्मुस्ते सर्व एव महर्षयः ॥ सोऽपि राजर्षिरगमत् सभार्य्यो नगरं निजम् । ततो बहुतिथे काले सा राज्ञो महिषी प्रिया ॥ अवाप गर्भं तन्वङ्गी तस्मात् नृपतिसत्तमात् । गुर्व्विण्यामथ भार्य्यायां ममारासौ नराधिपः ॥ सा चाप्यारोढुमिच्छन्ती भर्त्तारं वै पतिव्रता । निवारिता तदामात्यैर्न तथापि व्यतिष्ठत ॥ तं समालिङ्ग्य भर्त्तारं चितायामारुरोह सा । ततोऽग्निमध्यात् सलिले मांसपेश्यपतन्मुने ! ॥ साम्भसा सुखशीतेन संसिक्ता सप्तधाऽभवत् । तेऽजायन्ताथ मरुत औत्तमस्यान्तरे मनोः ॥ तामसस्यान्तरे ये च मरुतोऽप्यभवन् पुरा । तानहं कीर्त्तयिष्यामि गीतनृत्यकलिप्रिय ! ॥ तामसस्य मनोः पुत्त्र ऋतध्वज इति श्रुतः । स पुत्त्रार्थी जुहावाग्नौ स्वमांसं रुधिरं तथा ॥ अस्थीनि रोम केशांश्च स्नायुमज्जायकृद्बणम् । शुक्रं च वित्तसो राजा सुतार्थी चेति नः श्रुतम् ॥ सप्तार्च्चिर्मध्याच्च ततः शुक्रपातादनन्तरम् । मा मा क्षिपस्वेत्यसरत् शब्दः सोऽपि नृपो मृतः ॥ ततस्तस्माद्धुतवहात् सप्त तत्तेजसोपमाः । शिशवः समजायन्त ते रुदन्तश्च तन्मुने ! ॥ तेषान्तु ध्वनिमाकर्ण्य भगवान् पद्मसम्भवः । समागम्य निवार्य्याथ स चक्रे मरुतः सुतान् ॥ ते त्वासन्मरुतो ब्रह्मं स्तामसे देवतागणाः । येऽभवन्रैवते तांश्च शृणुष्व त्वं तपोधन ! ॥ रैवतस्यान्ववाये तु राजासीद्रिपु-